Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका – ६५ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि तृतीयायां विशाखाक्षत्रयुक्तः मङ्गलवासरः ०४ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

जीवन्तं मृतवन्मन्ये देहिनं धर्मवर्जितम् ।
मृतो धर्मेण संयुक्तो दीर्घजीवी न संशयः ॥

*A man without religion is a living dead. A man with religion lives even after the death.*

(कौटिल्यस्य नयः)

## रामरावणयोर्युद्धं कस्माद् बभूव?

रामरावणयोयुद्धं बहूनां मरणस्य कारणम् अभूत् । बहवो राक्षसाः यमालयं प्राविशन् । किन्तु ते अपराधिनो नासन् । रावणः सीतापहरणं कृतवान् इत्येव रामायणयुद्धम् अभवत्। एकस्यापराधेन बहवो मृताः। रावणः सीतां केन कारणेनापजहार ? तस्यां तस्य महान् मोह आसीत्। मोहः कस्मादुदभवत् ? शूर्पणखा स्वावमानस्य प्रतीकारं कर्तुं रावणस्याग्रे सीताया रूपं वर्णयामास। अत एव सोऽपहरणाय तन्त्रं चकार। एवं रामरावणयुद्धस्य शूर्पणखा कारणं बभूव । दण्डकारण्ये शूर्पणखा यदृच्छयागता । तदागमनम् आकस्मिकम् । तदेव सीतापहरणस्य राक्षसकुलनाशस्य च कारणम् अभवत् । यदि राम एव वनवासाय नागमिष्यत्, तर्हि शूर्पणखादर्शनं वा सीतापहरणं वा नैव अभविष्यत्। रामवनवासस्य कारणं तु कैकेय्याः वरद्वयी, तत्र कारणं मन्थराया दुर्बोधनम् इति कारणपरम्परा । चम्पूरामायणकारो विदर्भराजो वदति -

**प्राङ्मन्थरेति महिषीति वरद्वयीति**
**धर्मव्यथाभरित भूपति भारतीति ।**
**काकुत्स्थाकाननकथेति च सन्ति संज्ञाः**
**पौलस्त्यहीनभुवनत्रयभाग्यपङ्क्तेः ॥** इति ।

## हिंसाधिक्यस्य अपायः

श्रीनगर-भारतीयसेनया सीमा-नियन्त्रणरेखायां कृतेन आक्रमणेन जम्मुकाश्मीरप्रदेशे हिंसा वर्धत इति आतङ्कं प्राकटयत् मुख्यमन्त्रिणी मेहबूबामुफ्तिः। अनेन आक्रमणेन उग्राणां हननेन च सीमाप्रदेशे गम्भीा परिस्थितिः वर्तते । अतः राज्ये सङ्घर्षः वर्धते इति सा अवादीत्। युद्धसन्नाहः स्थगनीयः पुनरेकवारं भारतपाकिस्तानदेशयोर्मध्ये वार्तालापः आवश्यकः। शान्त्या एव समस्या परिहरणीया इति सा अभिप्रायमवदत्। अधुनैव सर्वदा तीव्रः हिंसाचारः जम्मुकाश्मीरप्रदेशे बाधते। यदि हिंसाचारः इतोऽपि वर्धते चेत् जनजीवनं क्लिष्टकरं भवति। हिंसायाः दुष्परिणामविचारे स्पष्टचित्रणं मम वर्तते इति सा अवोचत्। षड्भ्यः दशकेभ्यः वर्तते महत् वैरम् । अतः शान्त्या परिहारः न सुलभः। परं द्वेषभावनया हिंसा वर्धते । अतः अस्मिन्राज्ये विशेषेण

## शृङ्गगिरौ शरन्नवरात्रिः

शृङ्गेरी-अस्मिन् पवित्रक्षेत्रे अस्य मासस्य अन्तिमदिनात् आरभ्य शरन्नवरात्रोत्सवः सम्पत्स्यते । परमपूज्याः श्रीभारतीतीर्थमहा - स्वामिनः अन्ये श्रीमठाधिकारिणश्च उत्सवस्य नेतृत्वं वहन्ति । अक्टोबर मासस्य द्वादशे दिने श्रीशारदाम्बा रथोत्सवः सम्पत्स्यते । प्रतिदिनं श्रीशारदाम्बायाः विशेषालङ्काराः शोभिष्यन्ते । शङ्करदूरदर्शनजालतः प्रत्यक्षदर्शनमवकाशः कल्पितः।

## तिरुमले ब्रह्मरथोत्सवः

तिरुपतिः-अत्र शैलस्योपरि विराजमानस्य श्री वेङ्कटेश्वरस्य सलकट्टलब्रह्मोत्सवः अक्टोबर-मासस्य ह्यः तृतीयदिनाङ्कतः एकादशतमदिनाङ्क पर्यन्तं प्रचलिष्यति।

## सेनाशिबिरमुपरि समाक्रमणम्

श्रीनगरम्-उग्राततायिनः दुष्टाः भारत सेनाशिबिराणि आक्रमन्त एव सन्ति। गत कतिपयदिवसेषु उरिसेना शिबिराण्युपरि उग्राततायिनः आक्रमणानि कृत्वा अनेकान् योधान् जघ्नुः। ततः भारतस्य वीराः योधाः सीमाप्रदेशेषु जागरूकास्सन्तः उग्राततायिनः उपरि प्रत्याक्रमणनि कृत्वा अनेकान् उग्रान् नाशयामासुः। अथापि उग्राः तूष्णीं नोपविष्टाः। भानुवासरे रात्रौ जम्मु-काश्मीरस्य बारामुल्लामण्डले स्थितस्य ४६ तम राष्ट्रिय रैफलस् सेना शिबिरस्य समीपे भारतीयसेनायोधाः उग्रात-तायिनः उपरि झटिति गुळिकास्त्राणि प्रायुञ्जत । भारतसीमा-प्रदेशानतिक्रम्य अन्तः प्रवेष्टुं समागतान् दुष्टान् उग्रान् भारतीय-योधाः समाक्रम्य तान् नाशयामासुः प्रतिनिवर्तयामासु च । अनेन आक्रमणेन अतीवजागरूका भारतीययोधाः सर्वदा जागरूकास्सन्तः भारतदेशरक्षणाय कटिबद्धा तिष्ठन्ति ।

## जयललितायाः आरोग्यस्थिति उत्तमा

चेन्नै-तमिळुनाडुराज्यस्य मुख्या-मात्या कुमारी जयललिता ज्वर-व्याधिना निर्जलीकरणेन च दुर्बला सती चेन्नैनगरस्य अपोलो चिकित्सालयं कतिपयदिवसेभ्यः प्रागेव नीता । एकादशदिवसेभ्यः वैद्याः सततं तस्याः आरोग्यस्थितिं दर्शयन्तः औषधानि दास्यन्तस्सन्ति। ब्रिटन्देशस्य वैद्यस्य डा. रिचर्ड्बेले नेतृत्वे वैद्याः तां जयललितां चिकित्सयन्तस्सन्ति रोगनिरोधकौषधानि वैद्याः प्रतिदिनं दास्यन्तो वर्तन्ते । पुनरपि कतिपय दिवसान् अत्रैव सा यापयेदिति वैद्याः अवदन्। तमिळुनाडुराज्यस्य राज्यपालः विद्यासागरराव् चिकित्सालयं गत्वा फलादिकं तस्यै दत्वा शीघ्रातिशीघ्रं रोगमुक्तासती गृहमागच्छेः त्वायिति सदाशयान् अवदन्। मुख्यामात्या सा स्वस्था वर्तते। आतङ्कः नैव करणीयः। सा एका गौरवान्वितस्त्री। अतः तस्याः छायाचित्रं माध्यमद्वारा नैव प्रकटयिष्यते इति सः राज्यपालः सर्वान् अवादीत् ।

## अतीफास्लामस्य सङ्गीत कार्यक्रमः स्थगितः

गुरुग्राम-गुरुग्रामे अक्टोबरमासस्य पञ्चदशे दिने पाकिस्तानस्य प्रख्यात गायनस्य अतीफास्लमस्य सङ्गीतकार्यक्रमः आयोजितः अवर्तत। अधुना सः स्थगितः। उरिसेनाशिबिरस्योपरि उग्राः आक्रमणमकुर्वन्। तदाक्रमणं विरुध्य प्रतीकाराय भारतीयसैनिकाः पाकिस्तानस्य उग्रान् अघ्नन्। अतः अधुना सूक्ष्मः सन्निवेशः सर्वत्रास्ति। अतः अहितकरघटनानिवारणाय कार्यक्रमः स्थगितः। कार्यक्रमः अग्रे सारणीयः इत्यपि सूचना मण्डल-शासनेन आयोजकेभ्यः प्रदत्तासीत्। तथैव नगरे पाकिस्तानस्य सङ्गीत कार्यक्रमाय अवकाशो नैव देयः इति अखिलभारतीयहिन्दूक्रान्तिदलस्य सदस्याः मण्डलाधिकारिणे विज्ञाप्ति पत्रं दत्तवन्तः आसन्। बेङ्गळूरुनगरे अपि पाकिस्तानगायनस्य सङ्गीत-कार्यक्रमः स्थगितः अस्ति ।

## अबुधाबे: युवराजः गणराज्योत्सवस्यातिथिः

नवदिल्ली-आगामिनि वत्सरे जनवरि मासस्य षड्विंशे दिनाङ्के नवदेहल्यां सम्पत्स्यमाने गणराज्योत्सवदिना-चरणे अबुधाबिदेशस्य युवराजः शेकमोहमद्बिन्जायेदाल्नह्यानः मुख्यातिथिरूपेण भागं वक्ष्यति। अयं विचारः विदेशाङ्गविभागस्य वक्त्रा विकासस्वरूपेण प्रकटितः। युवराजः आह्वानं मुक्तमनसा स्वीकृत्य धन्यवादपत्रं प्रधानिनं प्रति अलेखीत्। अस्य युवराजस्य भारत देशसन्दर्शनेन भारतसंयुक्तारब्सङ्घटन देशयोर्मध्ये भद्रतायाः वाणिज्यस्य च क्षेत्रेषु द्विपक्षीयसम्बन्धः वर्धेत इति ऊहन्ते तज्ज्ञाः। पाकिस्तानेन सह अरबराष्ट्रस्य उत्तमबान्धव्यं वर्तते । अधुना भारतदेशः यदि तेन सह राजतान्त्रिकसम्बन्धं स्थापयति तर्हि पाकिस्तानः एकाङ्गी भविष्यति। अत एव सीमातः बाहीकभयोत्पादननिग्रहाय इदम् आह्वानं कृतमिति अस्ति ऊहः।

## नूतनपक्षस्यारम्भः

नवदिल्ली-आमादमिपक्षात्-उच्चाटितौ योगेन्द्रयादवप्रशान्त-भूषणौ स्वराजिण्डियानामकं नूतन पक्षम् आरब्धवन्तौ । परम् अयं पक्षः आगामिनि पञ्जाबराज्यस्य निर्वाचने न स्पर्धिष्यते। किन्तु देहल्याः नगरपालिकनिर्वाचने नूनं स्पर्धा भविष्यति इति यादवः अवादीत्। सन्दर्भेऽस्मिन् देहल्याः मुख्यमन्त्रिणं अरविन्दकेज्रीवालं यादवः सम्यक् अनिन्दत्। केज्रीवालः वञ्चनामकरोत् इति सः आरोपितवान्। गते एप्रिल्मासे एतौ पक्षात् उच्चाटितौ आस्ताम्। तदारभ्य स्वराजभियानम् एतैः आरब्धमवर्तत । "प्रत्येकतया स्वराजभियानकार्यम् अनुवर्तते। निर्वाचनराजकार्ये अनासक्तेभ्यः अभियाने वेदिका कल्प्यते । प्रशान्तः तस्य नेताभविष्यति" इति यादवः अभणत् । "पक्षस्य अपेक्षया विभिन्नचिन्तनं यदि सदस्येषु अस्ति तर्हि तस्य अभिव्यक्तीकरणाय अवकाशः नूनं प्रकल्प्यते । तेभ्यः पूर्णं स्वातन्त्र्यम् अस्ति" इति प्रशान्तभूषणः अवादीत्।

एवमेव गोवाराज्येऽपि राष्ट्रिय-स्वयंसेवकसङ्घात् उच्चाटितनायकः सुभाषवेलिङ्करः अपि गोवासुरक्षा मञ्चनामकस्य नूतनपक्षस्य आरम्भम् अकरोत्। तथैव आगामिनिर्वाचने भारतीयजनतापक्षं पराजेतुं प्रयत्नः तेन क्रियते । प्रादेशिक-भाषासम्बद्धविचारे वेलिङ्करः भारतीयजनतापक्षस्य नेतृन् बहिरङ्गतया निन्दितवान् आसीत्। अतः सः राष्ट्रियस्वयंसेवकसङ्घस्य नायकस्थानात् च्यावितः आसीत्। शिवसेनया गोवाप्रजापक्षेण च सह सहसम्बन्धस्थापनाय यत्नः क्रियते इति वेलिङ्करः अवादीत्। परं गोवाराज्यस्य मुख्यमन्त्री लक्ष्मीकान्तपर्सेकरः नूतनपक्षेण कापि हानिर्न भविष्यति। मतविभजनेन अस्माकं पक्षस्य जयः एव निश्चितः इति विश्वासं प्राकटयत्।